# বংশ বৃদ্ধিকরং দুর্গাকবচম্

{॥ বংশ বৃদ্ধিকরং দুর্গাকবচম্ ॥}

ভগবন্ দেব দেবেশকৃপযা ত্বং জগত্ প্রভো ।

বংশাখ্য কবচং ব্রূহি মহ্যং শিষ্যায তেঽনঘ ।

যস্য প্রভাবাদ্দেবেশ বংশ বৃদ্ধির্হিজাযতে ॥ ১॥

॥ সূর্য ঊবাচ ॥

শৃণু পুত্র প্রবক্ষ্যামি বংশাখ্যং কবচং শুভম্ ।

সন্তানবৃদ্ধির্যৎপঠনাদ্গর্ভরক্ষা সদা নৃণাম্ ॥ ২॥

বন্ধ্যাপি লভতে পুত্রং কাক বন্ধ্যা সুতৈর্যুতা ।

মৃত বৎসা সুপুত্রস্যাৎস্রবদ্গর্ভ স্থিরপ্রজা ॥ ৩॥

অপুষ্পা পুষ্পিণী যস্য ধারণাশ্চ সুখপ্রসূঃ ।

কন্যা প্রজা পুত্রিণী স্যাদেতত্ স্তোত্র প্রভাবতঃ ॥ ৪॥

ভূতপ্রেতাদিজা বাধা যা বাধা কুলদোষজা ।

গ্রহ বাধা দেব বাধা বাধা শত্রু কৃতা চ যা ॥ ৫॥

ভস্মী ভবন্তি সর্বাস্তাঃ কবচস্য প্রভাবতঃ ।

সর্বে রোগা বিনশ্যন্তি সর্বে বালগ্রহাশ্চ যে ॥ ৬॥

॥ অথ দুর্গা কবচম্ ॥

ওঁ পূর্বং রক্ষতু বারাহী চাগ্নেয্যাং অম্বিকা স্বযম্ ।

দক্ষিণে চণ্ডিকা রক্ষেন্নৈঋত্যাং শববাহিনী ॥ ১॥

বারাহী পশ্চিমে রক্ষেদ্বাযব্যাম্ চ মহেশ্বরী ।

উত্তরে বৈষ্ণবীং রক্ষেত্ ঈশানে সিংহ বাহিনী ॥ ২॥

ঊর্ধ্বাং তু শারদা রক্ষেদধো রক্ষতু পার্বতী ।

শাকংভরী শিরো রক্ষেন্মুখং রক্ষতু ভৈরবী ॥ ৩॥

কণ্ঠং রক্ষতু চামুণ্ডা হৃদযং রক্ষতাত্ শিবা ।

ঈশানী চ ভুজৌ রক্ষেত্ কুক্ষিং নাভিং চ কালিকা ॥ ৪ ॥

অপর্ণা হ্যুদরং রক্ষেৎকটিং বস্তিং শিবপ্রিযা ।

ঊরূ রক্ষতু কৌমারী জযা জানুদ্বযং তথা ॥ ৫॥

গুল্ফৌ পাদৌ সদা রক্ষেদ্ব্রহ্মাণী পরমেশ্বরী ।

সর্বাঙ্গানি সদা রক্ষেদ্দুর্গা দুর্গার্তিনাশনী ॥ ৬॥

নমো দেব্যৈ মহাদেব্যৈ দুর্গাযৈ সততং নমঃ ।

পুত্রসৌখ্যং দেহি দেহি গর্ভরক্ষাং কুরুষ্ব নঃ ॥ ৭॥

ওঁ হ্রীং হ্রীং হ্রীং শ্রীং শ্রীং শ্রীং ঐং ঐং ঐং

মহাকালী মহালক্ষ্মী মহাসরস্বতী রুপাযৈ

নবকোটিমূর্ত্যৈ দুর্গাযৈ নমঃ ॥ ৮॥

হ্রীং হ্রীং হ্রীং দুর্গার্তিনাশিনী সংতানসৌখ্যম্ দেহি দেহি

বন্ধ্যত্বং মৃতবৎসত্বং চ হর হর গর্ভরক্ষাং কুরু কুরু

সকলাং বাধাং কুলজাং বাহ্যজাং কৃতামকৃতাং চ নাশয

নাশয সর্বগাত্রাণি রক্ষ রক্ষ গর্ভং পোষয পোষয

সর্বোপদ্রবং শোষয শোষয স্বাহা ॥ ৯॥

॥ ফল শ্রুতিঃ ॥

অনেন কবচেনাঙ্গং সপ্তবারাভিমন্ত্রিতম্ ।

ঋতুস্নাত জলং পীত্বা ভবেত্ গর্ভবতী ধ্রুবম্ ॥ ১॥

গর্ভ পাত ভযে পীত্বা দৃঢগর্ভা প্রজাযতে ।

অনেন কবচেনাথ মার্জিতাযা নিশাগমে ॥ ২॥

সর্ববাধাবিনির্মুক্তা গর্ভিণী স্যান্ন সংশযঃ ।

অনেন কবচেনেহ গ্রন্থিতং রক্তদোরকম্ ॥ ৩॥

কটি দেশে ধারযন্তী সুপুত্রসুখ ভাগিনী ।

অসূত পুত্রমিন্দ্রাণাং জযন্তং যৎপ্রভাবতঃ ॥ ৪॥

গুরূপদিষ্টং বংশাখ্যম্ কবচং তদিদং সুখে ।

গুহ্যাদ্গুহ্যতরং চেদং ন প্রকাশ্যং হি সর্বতঃ ॥ ৫॥

ধারণাত্ পঠনাদস্য বংশচ্ছেদো ন জায়তে ।

বালা বিনশ্যংতি পতন্তি গর্ভাস্তত্রাবলাঃ কষ্টযুতাশ্চ বন্ধ্যাঃ ॥ ৬ ॥

বাল গ্রহৈর্ভূতগণৈশ্চ রোগৈর্ন যত্র ধর্মাচরণং গৃহে স্যাত্ ॥

॥ ইতি শ্রী জ্ঞান ভাস্করে বংশ বৃদ্ধিকরং বংশ কবচং

সম্পূর্ণম্ ॥

Encoded and proofread by Arun Shantharam shantharam.arun at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Vamsha Vruddhikaram Durga Kavacham Lyrics in Bengali PDF
% File name : vanshavRiddhikaradurgAkavacha.itx
% Category : kavacha
% Location : doc_devii
% Author : jnaana bhaaskara
% Language : Sanskrit

% Subject : philosophy/hinduism/religion
% Transliterated by : Arun Shantharam shantharam.arun at gmail.com
% Proofread by : Arun Shantharam shantharam.arun at gmail.com
% Latest update : April 12, 2009
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website